# Sri Ranganata Stotram

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे मृदुतरफणिराड्भोगपर्यङ्कभागे ।
निद्रामुद्राभिरामं कटिनिकटशिरःपार्श्वविन्यस्तहस्तं
पद्माधात्रीकराभ्यां परिचितचरणं रङ्गराजं भजेऽहम् ॥१ ॥

कस्तूरीकलितोर्ध्वपुण्ड्रतिलकं कर्णान्तलोलेक्षणं
मुग्धस्मेरमनोहराधरदलं मुक्ताकिरीटोज्वलम् ।
पश्यन्मानसपश्यतोहररुचः पर्यायपङ्केरुहं
श्रीरङ्गाधिपतेः कदा नु वदनं सेवेय भूयोऽप्यहम् ॥२ ॥

कदाऽहं कावेरीतटपरिसरे रङ्गनगरे
शयानं भोगीन्द्रे शतमखमणिश्यामालरुचिम् ।
उपासीनः क्रोशन् मधुमधन ! नारायण ! हरे !
मुरारे ! गोविन्देत्यनिशमपनेष्यामि दिवसान् ॥३ ॥

कदाऽहं कावेरीविमलसलिले वीतकलुपो
भवेयं तत्तीरे श्रममुषि वसेयं शनवने ।
कदा वा तं पुण्ये महति पुलिने मङ्गलगुणं
भजेयं रङ्गेशं कमलनयनं शोपशयनम् ॥४ ॥

पूगीकण्ठद्वयससरमस्निग्धनीरोपकण्ठां
आविर्मोदस्तिमितशकुनानूदितब्रह्मघोषाम् ।

मार्गे मार्गे पथिकनिवहैरुञ्छ्यमानापवर्गा
पश्येयं तां पुनरपि पुरीं श्रीमतीं रङ्गधाम्नः ॥५ ॥

न जातु पीतामृतमूर्च्छितानां
नाकौकसां नन्दनवाटिकासु ।
रङ्गेश्वर त्वत्पुरमाश्रितानां
रथ्याशुनामन्यतमो भवेयम् ॥६ ॥

असन्निकृष्टस्य निकृष्टजन्तोः
मिथ्यापवादेन करोषि मान्तिम् ।
ततो निकृष्टे मयि सन्निकृष्टे कां
निष्कृतिं रङ्गपते करोषि ॥७ ॥

श्रीरङ्ग करिशैलमञ्चनगीरिं तार्क्ष्याद्रि सिंहाचलौ
श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम् ।
श्रीमद्द्वारवती प्रयागमथुरायोध्यागयाः पुष्करं
सालग्रामगिरिं निषेव्य रमतेरामानुजोऽयं मुनिः ॥८ ॥